चन्दनागुरुकस्तूरीपङ्कलेपैर्व्विराजितैः ।
विहरद्भिर्व्विष्णुभक्तैः कार्य्य एव महोत्सवः ।
ध्यायेद्वृन्दावने रम्ये यमुनापुलिने वने ॥
निकुञ्जसदने कृष्णं गोपीमण्डलमण्डितम् ।
रासमण्डलमध्यस्थं गोविन्दं कर्णिकागतम् ॥
द्वयोर्द्वयोर्गोपिकयोर्म्मध्ये चात्मानमेकधा ।
अपरं नटवेशेन मध्ये तं मुरलीधरम् ॥
गोपीमुखसुखाम्भोजमधुपानमधुव्रतम् ।
कुलालचक्रप्रतिमं मण्डलं पङ्क्त्याङ्कितम् ॥
द्वादशशोभितं कार्य्यं महिष्योऽष्टौ च यन्त्रिषु ।
मध्ये मध्ये च गोविन्दं पार्श्वयोरष्टरूपकम् ॥
मुकुन्दं माधवं कृष्णं नटनागरमेव च ।
हरिं दामोदरं विष्णुं पूजयेत् कामरूपिणम् ॥
सहाङ्घ्रि भूपुरे गोप्यः शतशोऽथ सहस्रशः ।
पूजनीयाः प्रयत्नेन नृत्यगीतपरायणाः ॥
असंख्या गोपिकास्तत्र मण्डलेऽष्टौ वराङ्गनाः ।
महिष्यस्ताः समाख्याताः सदासङ्गसुनिव्रताः ॥
भक्तोत्सवाभिलाषेन कमला बहुरूपिणी ।
रावा विशाखा विमला सुमित्रा ललिता तथा ।
सुन्दरी कमला रम्भा महिष्योऽष्टौ प्रकीर्त्तिताः ॥
तारा राधा निराबाधा कृष्णा भेदमुपागताः ।
तासां ध्यानैर्व्वक्ष्यमाणैः पूजा कार्य्या विशेषतः ॥
उत्तीर्णे सायं समये गोप्यो वृन्दावनं ययुः ।
रासक्रीड़ां ततस्ताभिश्चक्रे च जगदीश्वरः ॥
गोप्यो रासक्रीड़ां चक्रुः पौर्णमास्यां महा-
निशि ।
न तत्र पवननिनदो न भिल्लीनिनदस्तथा ॥
महानिशा द्वे घटिके रात्रेर्म्मध्यमयामयोः ।
तदप्राप्तौ च कर्त्तव्यं पौर्णमास्यां निशामुखे ॥
एवं रासक्रीड़ां यस्तु कारयेद्भुवि मानवः ।
स सर्व्वदुष्कृतं त्यक्त्वा निर्व्वाणमुक्तिमाप्नुयात् ॥”
इत्युत्कलकलिका ॥
(विलासः । यथा, भागवते । ५ । २ । १२ ।
“असद्विधस्य मम छन्नयनौ बिभर्त्ति
वक्त्रद्रुतं मधुरराससुधादिवक्त्रे ॥”
“वक्त्रे च वक्त्रद्रुतं बिभर्त्ति किं तदाह । रसो
मधुरालापः रासो विलासस्ताभ्यां सहिता सुधा
अधरामृतम् । आदिशब्दात् स्मितनर्म्मादि ।”
इति तत्र श्रीधरस्वामी ॥ क्रिया । यथा, भाग-
वते । ५ । १३ । १७ ।
“तैर्वञ्चितो हंसकुलं समाविशन्
नरोचयन् शीलमुपैति वानरान् ।
तज्जातिरासेन सुनिर्वृतेन्द्रियः
परस्परोद्वीक्षणविस्मृतावधिः ॥”
“तैर्वञ्चितस्तत्र फलाभावं ज्ञात्वा हंसानां ब्राह्म-
णानां कुलं पुनः प्रविशन् तेषां शीलं प्राय-
श्चित्तपूर्ब्बकं पुनरुपनयनाद्याचारमरोचयन्
अप्रियं पश्यन् वानरतुल्यान् भ्रष्टाचारान्
शूद्रप्रायानुपैति । तज्जातिरासेन तज्जाति-
क्रियया स्त्रियां मिथुनीभूय परस्परमुखोद्वीक्ष-
णेन विस्मृतो जीवितावधिर्मरणकालो येन ।”
इति तट्टीकायां श्रीधरस्वामी ॥ * ॥)

रासभः, पुं, (रासते शब्दायते इति । रास+
“रासिवल्लिभ्याञ्च ।” उणा० ३ । १२५ । इति
अभच् ।) गर्द्दभः । इत्यमरः । २ । ९ । ७८ ॥
(अयं हि ब्रह्मणः पद्भ्यां जातः । यथा, मार्क-
ण्डेये । ४८ । २६ ।—
“पद्भ्यामश्वान् समातङ्गान् रासभान् शशकान्
मृगान् ।
उष्ट्रानश्वतरांश्चैव नानारूपाश्च जातयः ॥”
अश्वतरः । खच्चर इति भाषा । यथा, महा-
भारते । १ । १४५ । ७ ।
“स त्वं रासभयुक्तेन स्यन्दनेनाशुगामिना ।
वारणावतमद्यैव यथा यासि तथा कुरु ॥”)
रासभवन्दिनी, स्त्री, मल्लिका । इति शब्द-
चन्द्रिका ॥
रासभी, स्त्री, (रासभ+ङीप् ।) गर्द्दभी । इति
शब्दरत्नावली । (यथा, महाभारते । १३ ।
२७ । १४ ।
“एतत् श्रुत्वा मतङ्गस्तु दारुणं रासभीवचः ।
अवतीर्य्य रथात्तूर्णं रासभीं प्रत्यभाषत ॥”)
रासमण्डलं, क्ली, (रासस्य मण्डलम् ।) श्रीकृष्णस्य
रासक्रीड़ास्थलम् । तद्विवरणम् । यथा,—
“तस्मादुपरि गोलोकः पञ्चाशत्कोटियोजने ।
वायुना धार्य्यमाणश्च विचित्रपरमाश्रयः ॥
अतीवरम्यनिर्म्माणो नित्यरूपो महीच्छया ।
शतशृङ्गेण शैलेन पुण्यवृन्दावनेन च ॥
सुरासमण्डलेनापि नद्या विरजयावृतः ।
कोटियोजनविस्तीर्णा प्रस्थेन विरजा व्रज ॥
दैर्घ्ये तस्य शतगुणा परितः परमा शुभा ।
अमूल्यरत्ननिकरा हीरामाणिक्ययोस्तथा ॥
मणीनां कौस्तुभादीनामसंख्यानां मनोहरा ।
अमूल्यरत्ननिर्म्माणं तत्रापि प्रतिमन्दिरम् ॥
मनोहरञ्च प्राकारमहदं विश्वकर्म्मणा ।
गोपीभिर्गोपनिकरैर्वेष्टितं कामधेनुभिः ॥
कल्पवृक्षैः पारिजातैरसंख्यैश्च सरोवरैः ।
पुष्पोद्यानैः सुकोटिभिः संवृतं रासमण्डलम् ॥
वेष्टितं वेष्टितैर्गोपीमन्दिरैः शतकोटिभिः ।
रत्नप्रदीपयुक्तैश्च पुष्पतल्पसमन्वितैः ॥
सुगन्धिचन्दनामोदैः कस्तूरीकुङ्कुमान्वितैः ।
क्रीड़ोपयुक्तैर्भोगैश्च ताम्बूलैर्वासितैर्जलैः ॥
धूपैः सुरभिरम्यैश्च माल्यैश्च रत्नदर्पणैः ।
द्वारके रचितैः शश्वद्दासदासीनिकोटिभिः ॥
अमूल्यरत्नाभरणैर्व्वह्निशुद्धांशुकैरपि ।
सुसमत्तगजेन्द्राणां वेष्टितैश्च वनैः क्रमात् ॥
नवयौवनसम्पन्नै रूपैर्निरुपमैरपि ।
रम्यञ्च वर्त्तुलाकारं चन्द्रबिम्बं यथा व्रज ॥
अमूल्यरत्नरचितं दशयोजनविस्तृतम् ।
कस्तूरीकुङ्कुमै रम्यैः सुगन्धिचन्दनार्च्चितैः ॥
आवृतं मङ्गलघटैः फलपल्लवसंयुतैः ।
दधिलाजैश्च पर्य्यैश्च स्निग्धदूर्व्वाङ्कुरैः फलैः ॥
श्रीरामकदलीस्तम्भैरसंख्यैश्च मनोहरैः ।
पट्टसूत्रनिबद्धैश्च स्निग्धैश्चन्दनपल्लवैः ॥
चन्दनाक्तमाल्यैश्च भूषणैश्च विभूषितम् ।
अमूल्यरत्नरचितं शतशृङ्गं मनोहरम् ॥
कोटियोजनमूर्द्धञ्च दैर्घ्यं दशगुणोत्तरम् ।
शैलप्रस्थं परिमितं पञ्चाशत्कोटियोजनम् ॥
अतीवकमनीयञ्च वेदेऽनिर्व्वचनीयकम् ।
प्राकारमिव तस्यापि गोलोकस्य मनोहरम् ॥
परितो वेष्टितं रम्यं हीराहारसमन्वितम् ।
तत्र वृन्दावनं रम्यं युक्तं चन्दनपादपैः ॥
कल्पवृक्षैश्च रम्यैश्च मन्दारैः कामधेनुभिः ।
शोभितं शोभनाढ्यैश्च पुष्पोद्यानैर्मनोहरैः ॥
क्रीड़ासरोवरै रम्यैः सुरम्यै रतिमन्दिरैः ।
अतीवरम्यं रहसि रासयोग्यस्थलान्वितम् ॥
रचितं रत्नके रम्यैरसंख्यैर्गोपिकागणैः ।
परितो वर्त्तुलाकारं त्रिलक्षयोजनं वनम् ॥
षट्पदध्वनिसंयुक्तं पुंस्कोकिलरुतान्वितम् ।
तत्राक्षयवटो रम्यो रहस्येव हि विस्तृतः ॥
सहस्रयोजनोर्द्धञ्च परितश्च चतुर्गुणः ।
गोपीनां कल्पवृक्षश्च सर्व्ववाञ्छाफलप्रदः ॥
क्रीड़ान्वितैराहतश्च राधादासीनिलक्षकैः ।
विरजातीरनीरीणां समुनाशीतलेन च ॥
पुष्पान्वितेन मान्द्येन पवित्रेण सुगन्धिना ।
दासीगणैरसंख्यैश्च वृन्दावनविनोदिनी ॥
तत्र क्रीड़ति सा राधा मम प्राणाधिदेवता ।
सेयं श्रीदामशापेन वृषभानुसुताधुना ।
ब्रह्मादिदेवैः सिद्धेन्द्रैर्मुनीन्द्रैः पूजिता व्रज ॥”
इति ब्रह्मवैवर्त्ते भगवन्नन्दसंवादे श्रीकृष्णजन्म-
खण्डे ८४ अध्यायः ॥
रासयात्रा, स्त्री, (रासस्य यात्रा उत्सवः ।)
कार्त्तिकीपौर्णमासीकर्त्तव्यश्रीकृष्णस्योत्सवविशेषः ।
तद्विवरणं यात्राशब्दे द्रष्टव्यम् ॥ * ॥ शक्ति-
विषयकरासयात्रा यथा,—
“पौर्णमास्यां रासयात्रां देव्याः कुर्य्यान्नि-
शार्द्धके ।
पूर्ब्बवत् समास्थाप्य देवीं देव्यासनं यजेत् ॥”
पौर्णमास्यां चैत्रपौर्णमास्याम् ।
“संमुखे राससंस्थानं भैरवीभैरवान्वितम् ।
कृत्वा तान् पूजयित्वा च भ्रामयेत् कुम्भचक्रवत् ॥
कोलाहलं मृदङ्गादिवाद्यैर्नृत्यैः सुगीतकैः ।
कुर्य्यादानन्दहृदयः साधकः स्थिरमानसः ॥
वित्तशाठ्यं न कुर्व्वीत देवीयात्रा सुखप्रदा ॥”
इति वामकेश्वरतन्त्रे ५४ पटलः ॥
रासेरसः, पुं, (रासे क्रीड़ाविशेषे यो रसः ।
अलुक्समासः ।) गोष्ठी । रासः । शृङ्गारः ।
रसविहिः । रसायासः । सहोन्नागरकः । इति
मेदिनी । सै, ६० ॥ उत्सवः । इति शब्दरत्ना-
वली ॥ परिहासः । इति जटाधरः ॥
रासेश्वरी, स्त्री, (रासस्य ईश्वरी ।) राधा ।
यथा,—
“राधा रासेश्वरी रासवासिनी रसिकेश्वरी ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १७ अध्यायः ॥
रास्ना, स्त्री, (रस्यते इति । रस आस्वादने+
“रास्नासास्नास्थूणावीणाः ।” उणा० ३ । १५ ।
इति नप्रत्ययेन साधुः ।) स्वनामख्यातलता ।